

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## चतुर्थकाण्डे द्वितीयः प्रश्नः

### देवयजनग्रहाभिधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

विष्णोः क्रमोऽस्यभिमातिहा गायत्रञ्छन्द आ रोह पृथिवीमनु वि क्रमस्व निर्भक्तः स यन्द्विष्मो विष्णोः क्रमोऽस्यभिशस्तिहा त्रैष्टुभञ्छन्द आ रोहान्तरिख्षमनु वि क्रमस्व निर्भक्तः स यं द्विष्मो विष्णोः क्रमोऽस्यरातीयतो हन्ता जागतञ्छन्द आ रोह दिवमनु वि क्रमस्व निर्भक्तः स यं द्विष्मो विष्णोः ॥ [१] ॥ क्रमोऽसि शत्रूयतो हन्ताऽऽनुष्टुभञ्छन्द आ रोह दिशोऽनु वि क्रमस्व निर्भक्तः स यन्द्विष्मः॥ अक्रन्ददग्निः स्तनयन्निव द्यौः ख्षामा रेरिहद्वीरुधः समञ्जन्न्। सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः॥ अग्नेऽभ्यावर्तिन्नभि न आ वर्तस्वाऽऽयुषा वर्चसा सन्या मेधया प्रजया धनेन॥ अग्ने ॥ [२] ॥ अङ्गिरः शतन्ते सन्त्वावृतः सहस्रन्त उपावृतः। तासाम्पोषस्य पोषेण पुनर् नो नष्टमा कृधि पुनर् नो रयिमा कृधि॥ पुनरूर्जा नि वर्तस्व पुनरग्न इषाऽऽयुषा। पुनर् नः पाहि विश्वतः॥ सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया। विश्वफ्स्निया विश्वतस्परि॥ उदुत्तमँव्वँरुण पाशमस्मदवाधम ॥ [३] ॥ व्वि मद्ध्यमꣳ श्रथाय। अथा वयमादित्य व्रते तवानागसो अदितये स्याम॥ आ त्वाऽहार्षमन्तरभूर् ध्रुवस्तिष्ठाऽविचाचलिः। विशस्त्वा सर्वा वाञ्छन्त्वस्मिन् राष्ट्रमधि श्रय॥ अग्ने बृहन्नुषसामूद्ध्वो अस्थान्निर्जग्मिवान्तमसो ज्योतिषाऽऽ*गात्। अग्निर् भानुना रुशता स्वङ्ग आ जातो विश्वा सद्मान्यप्राः॥ सीद त्वम्मातुरस्या ॥ [४] ॥ उपस्थे विश्वान्यग्ने वयुनानि विद्वान्। मैनामर्चिषा मा तपसाऽभि शूशुचोऽन्तरस्याꣳ शुक्रज्योतिर् वि भाहि॥ अन्तरग्ने रुचा त्वमु-

खायै सदने स्वे। तस्यास्त्वꣳ हरसा तपञ्जातवेदः शिवो भव॥ शिवो भूत्वा मह्यमग्नेऽथो सीद शिवस्त्वम्। शिवाः कृत्वा दिशः सर्वाः स्वाय्ँयोनिमिहाऽऽसदः॥ हꣳसः शुचिषद् वसुरन्तरिक्षसद्धोता वेदिषदतिथिर् दुरोणसत्। नृषद्वरसद् ऋतसद् व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम्बृहत् ॥ [५] ॥

(दिवमनु वि क्रमस्व निर्भक्तः स यन्द्विष्मो विष्णोर् द्धनेनाग्ने ऽधम मस्याः शुचिषथ् षोडश च) ॥ १ ॥

दिवस्परि प्रथमञ्जज्ञे अग्निरस्मद् द्वितीयम्परि जातवेदाः। तृतीयमप्सु नृमणा अजस्रमिन्धान एनञ्जरते स्वाधीः॥ विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते सद्म विभृतम्पुरुत्रा। विद्मा ते नाम परमङ्गुहा यद्विद्मा तमुथ्सय्ँयत आजगन्थ॥ समुद्रे त्वा नृमणा अप्स्वन्तर् नृचक्षा ईधे दिवो अग्न ऊधन्। तृतीये त्वा ॥ [६] ॥ रजसि तस्थिवाꣳसमृतस्य योनौ महिषा अहिन्वन्न्॥ अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन्न्। सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः॥ उशिक् पावको अरतिः सुमेधा मर्तेष्वग्निरमृतो नि धायि। इयर्ति धूममरुषम्भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षत्॥ विश्वस्य केतुर् भुवनस्य गर्भ आ ॥ [७] ॥ रोदसी अपृणाज्जायमानः। वीडुञ्चिदद्रिमभिनत् परायन् जना यदग्निमयजन्त पञ्च॥ श्रीणामुदारो धरुणो रयीणाम्मनीषाणाम्प्रार्पणः सोमगोपाः। वसोः सूनुः सहसो अप्सु राजा वि भात्यग्र उषसामिधानः॥ यस्ते अद्य कृणवद्भद्रशोचेऽपूपन्देव घृतवन्तमग्ने। प्र तन्नय प्रतराव्ँवस्यो अच्छाभि द्युम्नन्देवभक्तय्ँयविष्ठ॥ आ ॥ [८] ॥ तम्भज सौश्रवसेष्वग्न उक्थौक्थ आ भज शस्यमाने। प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भिनदुदुज्जनित्वैः॥ त्वामग्ने यजमाना अनु द्यून्विश्वा वसूनि दधिरे वार्याणि। त्वया सह द्रविणमिच्छमाना व्रजङ्गोमन्तमुशिजो वि वव्रुः॥ दृशानो रुक्म उर्व्या व्यद्यौद्दुमर्षमायुः श्रिये रुचानः। अग्निरमृतो अभवद्वयोभिर् यदेनन्द्यौरजनयथ् सुरेताः ॥ [९] ॥

(तृतिये त्वा गर्भ आ यविष्ठाऽऽ य च्चत्वारि च) ॥ २ ॥

अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः। प्र प्रदातारन्तारिष ऊर्जन्नो धेहि द्विपदे चतुष्पदे॥ उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः। स नो भव शिवतमः सुप्रतीको विभावसुः॥ प्रेदग्ने ज्योतिष्मान्याहि शिवेभिरर्चिभिस्त्वम्। बृहद्भिर्भानुभिर्भासन् मा हिꣳसी स्तनुवा प्रजाः॥ समिधाऽग्निन्दुवस्यत घृतैर् बोधयतातिथिम्। आ ॥ [१०] ॥ ऽस्मिन्हव्या जुहोतन॥ प्र प्रायमग्निर् भरतस्य शृण्वे वि यथ् सूर्यो न रोचते बृहद् भाः। अभि यः पूरुम्पृतनासु तस्थौ दीदाय दैव्यो अतिथिः शिवो नः॥ आपो देवीः प्रति गृह्णीत भस्मैतथ् स्योने कृणुद्ध्वꣳ सुरभावु लोके। तस्मै नमन्ताञ्जनयः सुपत्नीर् मातेव पुत्रम्बिभृता स्वेनम्॥ अप्स्वग्ने सधिष्टव ॥ [११] ॥ सौषधीरनु रुद्ध्यसे। गर्भे सञ्जायसे पुनः॥ गर्भो अस्योषधीनाङ्गर्भो वनस्पतीनाम्। गर्भो विश्वस्य भूतस्याग्ने गर्भो अपामसि॥ प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने। सꣳसृज्य मातृभिस्त्वञ्ज्योतिष्मान् पुनराऽसदः॥ पुनरासद्य सदनमपश्च पृथिवीमग्ने। शेषे मातुर् यथोपस्थेऽन्तरस्याꣳ शिवतमः॥ पुनरूर्जा ॥ [१२] ॥ नि वर्तस्व पुनरग्न इषाऽऽयुषा। पुनर् नः पाहि विश्वतः॥ सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया। विश्वफ्स्निया विश्वतस्परि॥ पुनस्त्वाऽऽदित्या रुद्रा वसवः समिन्धतां पुनर् ब्रह्माणो वसुनीथ यज्ञैः। घृतेन त्वन्तनुवो वर्द्धयस्व सत्याः सन्तु यजमानस्य कामाः॥ बोधा नो अस्य वचसो यविष्ठ मꣳहिष्ठस्य प्रभृतस्य स्वधावः। पीयति त्वो अनु त्वो गृणाति वन्दारुस्ते तनुवँव्वन्दे अग्ने॥ स बोधि सूरिर् मघवा वसुदावा वसुपतिः। युयोद्ध्यस्मद् द्वेषाꣳसि ॥ [१३] ॥

(आ तवोर् जा ऽनु षोडश च) ॥ ३ ॥

अपेत वीत वि च सर्पतातो येऽत्र स्थ पुराणा ये च नूतनाः। अदादिदय्ँयमोऽवसानम्पृथिव्या अक्रन्निमम्पितरो लोकमस्मै॥ अग्नेर् भस्मास्यग्नेः पुरीषमसि संज्ञानमसि कामधरणम्मयि ते कामधरणम्भूयात्॥ सय्ँया वः प्रियास्तनुवः सम्प्रिया हृदयानि वः। आत्मा वो अस्तु ॥ [१४] ॥ संप्रियः संप्रियास्तनुवो मम॥ अयꣳ सो अग्निर् यस्मिन्थ्सोममिन्द्रः सुतन्दधे जठरे वावशानः। सहस्रियव्ँवाजमत्यन्न सप्तिꣳ ससवान्थ् सन्थ् स्तूयसे जातवेदः॥ अग्ने दिवो अर्णमच्छा जिगास्यच्छा देवाꣳ ऊचिषे धिष्णिया ये। याः परस्ताद्रोचने सूर्यस्य याश्चा

वस्तादुपतिष्ठन्त आपः॥ अग्ने यत् ते दिवि वर्चः पृथिव्याय्ँयदोषधीष्व ॥ [१५] ॥ ऽफ्सु वा यजत्र। येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः॥ पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः। जुषन्ताꣳ हव्यमाहुतमनमीवा इषो महीः॥ इडामग्ने पुरुदꣳसꣳ सनिङ्गोः शश्वत्तमꣳ हवमानाय साध। स्यान्नः सूनुस्तनयो विजावाऽग्ने सा ते सुमतिर् भूत्वस्मे॥ अयन्ते योनिर्ऋत्वियो यतो जातो अरोचथाः। तञ्जान ॥ [१६] ॥ न्नग्न आ रोहाथा नो वर्द्धया रयिम्॥ चिदसि तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद परिचिदसि तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद लोकम्पृण छिद्रम्पृणाथो सीद शिवा त्वम्। इन्द्राग्नी त्वा बृहस्पतिरस्मिन् योनावसीषदन्न्॥ ता अस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः। जन्मन् देवानाव्ँविशस्त्रिष्वा रोचने दिवः ॥ [१७] ॥

(अस्त्वोषधीषु जान न्नष्टाचत्वारिꣳशच्च) ॥ ४ ॥

समितꣳ सङ्कल्पेथाꣳ संप्रियौ रोचिष्णू सुमनस्यमानौ। इषमूर्जमभि सव्ँवसानौ सव्ँवाम्मनाꣳसि सव्ँव्रता समु चित्तान्याऽकरम्॥ अग्ने पुरीष्याधिपा भवा त्वन्नः। इषमूर्जय्ँयजमानाय धेहि॥ पुरीष्यस्त्वमग्ने रयिमान् पुष्टिमाꣳ असि। शिवाः कृत्वा दिशः सर्वाः स्वाय्ँयोनिमिहाऽसदः॥ भवतन्नः समनसौ समोकसा ॥ [१८] ॥ वरेपसौ। मा यज्ञꣳ हिꣳसिष्टम्मा यज्ञपतिञ्जातवेदसौ शिवौ भवतमद्य नः॥ मातेव पुत्रम्पृथिवी पुरीष्यमग्निꣳ स्वे योनावभारुखा। ताव्ँविश्वैर् देवैर्ऋतुभिः सव्ँविदानः प्रजापतिर् विश्वकर्मा वि मुञ्चतु॥ यदस्य पारे रजसः शुक्रञ्ज्योतिरजायत। तन्नः पर्षदति द्विषोऽग्ने वैश्वानर स्वाहा॥ नमः सु ते निर्ऋते विश्वरूपे ॥ [१९] ॥ ऽयस्मयव्ँवि चृता बन्धमेतम्। यमेन त्वय्ँयम्या सव्ँविदानोत्तमन्नाकमधि रोहयेमम्॥ यत्ते देवी निर्ऋतिराबबन्ध दाम ग्रीवास्व विचर्त्यम्। इदन्ते तद् विष्याम्यायुषो न मद्ध्यादथा जीवः पितुमद्धि प्रमुक्तः॥ यस्यास्ते अस्याः क्रूर आसन् जुहोम्येषाम्बन्धानामवसर्जनाय। भूमिरिति त्वा जना विदुर् निर्ऋति ॥ [२०] ॥ रिति त्वाऽहम्परि वेद विश्वतः॥ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यान्तस्करस्यान्वेषि। अन्यमस्मदिच्छ सा त इत्या नमो देवि निर्ऋते तुभ्यमस्तु॥ देवीमहन्निर्ऋतिव्ँवन्दमानः पितेव पुत्रन्दसये वचोभिः। विश्वस्य या जायमानस्य वेद शिरःशिरः प्रति सूरी वि चष्टे॥ निवेशनः सङ्गमनो वसूनाव्ँविश्वा रूपाऽभि

चष्टे ॥ [२१] ॥ शचीभिः। देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनाम्॥ सव्वँ-
रत्रा दधातन निराहावान् कृणोतन। सिञ्चामहा अवटमुद्रिणव्वँयव्विँश्वाऽहाऽदस्तमक्षितम्॥
निष्कृताहावमवटꣳ सुवरत्रꣳ सुषेचनम्। उद्रिणꣳ सिञ्चे अक्षितम्॥ सीरा युञ्जन्ति कवयो
युगा वि तन्वते पृथक्। धीरा देवेषु सुम्नया॥ युनक्त सीरा वि युगा तनोत कृते योनौ वप-
तेह ॥ [२२] ॥ बीजम्। गिरा च श्रुष्टिः सभरा असन्नो नेदीय इथ् सृण्या पक्वमाऽयत्॥ लाङ्ग-
लम्पवीरवꣳ सुशेवꣳ सुमतिथ्सरु। उदित् कृषति गामविम्प्रफर्व्यञ्च पीवरीम्। प्रस्थावद्रथवा-
हनम्॥ शुनन्नः फाला वि तुदन्तु भूमिꣳ शुनङ्कीनाशा अभि यन्तु वाहान्। शुनम्पर्जन्यो मधुना
पयोभिः शुनासीरा शुनमस्मासु धत्तम्॥ कामङ्कामदुघे धुक्ष्व मित्राय वरुणाय च। इन्द्रायाग्नये
पूष्ण ओषधीभ्यः प्रजाभ्यः॥ घृतेन सीता मधुना समक्ता विश्वैर् देवैरनुमता मरुद्भिः। ऊर्जस्वती
पयसा पिन्वमानाऽस्मान्थ् सीते पयसाऽ भ्याववृथ्स्व ॥ [२३] ॥

(समोकसौ विश्वरूपे विदुर् निर्ऋति रभि चष्ट इह मित्राय द्वाविꣳशतिश्च) ॥ ५ ॥

या जाता ओषधयो देवेभ्यस्त्रियुगम्पुरा। मन्दामि बभ्रूणामहꣳ शतन्धामानि सप्त च॥
शतव्वो अंब धामानि सहस्रमुत वो रुहः। अथा शतक्रत्वो यूयमिमम्मे अगदङ्कृत॥ पुष्पा-
वतीः प्रसूवतीः फलिनीरफला उत। अश्वा इव सजित्वरीर् वीरुधः पारयिष्णवः॥ ओषधीरिति
मातरस्तद् वो देवीरुप ब्रुवे। रपाꣳसि विघ्नतीरित रप ॥ [२४] ॥ श्चातयमानाः॥ अश्वत्थे वो
निषदनम्पर्णे वो वसतिः कृता। गोभाज इत् किलासथ यथ् सनवथ पूरुषम्॥ यदहव्वाँजयन्निमा
ओषधीर्हस्त आदधे। आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा॥ यदोषधयः संग-
च्छन्ते राजानः समिताविव। विप्रः स उच्यते भिषग्रक्षोहाऽमीवचातनः॥ निष्कृतिर् नाम वो
माताऽथा यूयꣳ स्थ संकृतीः। सराः पतत्रिणीः ॥ [२५] ॥ स्थन यदामयति नि ष्कृत॥ अन्या
वो अन्यामवत्वन्याऽन्यस्या उपावत। ताः सर्वा ओषधयः सव्विँदाना इदम्मे प्रावता वचः॥
उच्छुष्मा ओषधीनाङ्गावो गोष्ठादिवेरते। धनꣳ सनिष्यन्तीनामात्मानन्तव पूरुष॥ अति विश्वाः
परिष्ठाः स्तेन इव व्रजमक्रमुः। ओषधयः प्राचुच्यवुर् यत् किञ्च तनुवाꣳ रपः॥ या ॥ [२६] ॥
स्त आतस्थुरात्मानय्याँ आविविशुः परुःपरुः। तास्ते यक्ष्मव्विँ बाधन्तामुग्रो मध्यमशी-

रिव॥ साकय्यँख्म प्र पत श्येनेन किकिदीविना। साकव्वाँतस्य ध्राज्या साकन्नश्य निहा-
कया॥ अश्वावतीꣳ सोमवतीमूर्जयन्तीमुदोजसम्। आ विथ्सि सर्वा ओषधीरस्मा अरिष्टता-
तये॥ याः फलिनीर् या अफला अपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूता स्तानो मुञ्चन्त्वꣳ
हसः॥ या ॥ [२७] ॥ ओषधयः सोमराज्ञीः प्रविष्टाः पृथिवीमनु। तासान्त्वमस्युत्तमा प्र
णो जीवातवे सुव॥ अवपतन्तीरवदन् दिव ओषदयः परि। यञ्जीवमश्ञवामहै न स रिष्याति
पूरुषः॥ याश्चेदमुपशृण्वन्ति याश्च दूरम्परागताः। इह सङ्गत्य ताः सर्वा अस्मै सन्दत्त भेषजम्॥
मा वो रिषत् खनिता यस्मै चाहङ्खनामि वः। द्विपच्चतुष्पदस्माकꣳ सर्वमस्त्वनातुरम्॥ ओषधयः
सव्वँदन्ते सोमेन सह राज्ञा। यस्मै करोति ब्राह्मणस्तꣳ राजन् पारयामसि ॥ [२८] ॥

(रपः पतत्रिणीर् या अꣳहसो याः खनामि वो ऽष्टादश च) ॥ ६ ॥

मा नो हिꣳसीज्जनिता यः पृथिव्या यो वा दिवꣳ सत्यधर्मा जजान। यश्चापश्चन्द्रा बृहती-
र्जजान कस्मै देवाय हविषा विधेम॥ अभ्यावर्तस्व पृथिवि यज्ञेन पयसा सह। वपान्ते अग्नि-
रिषितोऽव सर्पतु॥ अग्ने यत् ते शुक्रय्यँच्चन्द्रय्यँत् पूतय्यँद्यज्ञियम्। तद्देवेभ्यो भरामसि॥ इष-
मूर्जमहमित आ ॥ [२९] ॥ ददे ऋतस्य धाम्नो अमृतस्य योनेः। आ नो गोषु विशत्वौषधीषु
जहामि सेदिमनिराममीवाम्॥ अग्ने तव श्रवो वयो महि भ्राजन्त्यर्चयो विभावसो। बृहद्भानो
शवसा वाजमुक्थ्यन्दधासि दाशुषे कवे॥ इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य। स
दर्शतस्य वपुषो वि राजसि पृणख्षि सानसिꣳ रयिम्॥ ऊर्जो नपाज्जातवेदः सुशस्तिभिर्
मन्दस्व ॥ [३०] ॥ धीतिभिर् हितः। त्वे इषः सन्दधुर् भूरिरेतसश्चित्रोतयो वामजाताः॥
पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना। पुत्रः पितरा विचरन्नुपावस्युभे पृणख्षि
रोदसी॥ ऋतावानम्महिषव्विँश्वचर्षणिमग्निꣳ सुम्नाय दधिरे पुरो जनाः। श्रुत्कर्णꣳ सप्रथस्त-
मन्त्वा गिरा दैव्यम्मानुषा युगा॥ निष्कर्तारमध्वरस्य प्रचेतसङ्ख्षयन्तꣳ राधसे महे। राति-
म्भृगूणामुशिजङ्कविक्रतुम्पृणख्षि सानसिꣳ ॥ [३१] ॥ रयिम्॥ चितः स्थ परिचित ऊर्ध्व-
चितः श्रयध्वन्तया देवतयाऽङ्गिरस्वद् ध्रुवाः सीदत॥ आ प्यायस्व समेतु ते विश्वतः सोम

वृष्णियम्। भवा वाजस्य सङ्गथे॥ सन्ते पयांꣳसि समु यन्तु वाजाः सवँवृष्णियान्यभिमातिषाहः। आप्यायमानो अमृताय सोम दिवि श्रवाꣳस्युत्तमानि धिष्व ॥ [३२] ॥

(आ मन्दस्व सानसि मेकान्नचत्वारिꣳशच्च) ॥ ७ ॥

अभ्यस्थाद्विश्वाः पृतना अरातीस्तदग्निराह तदु सोम आह। बृहस्पतिः सविता तन्म आह पूषा माऽधाथ् सुकृतस्य लोके॥ यदक्रन्दः प्रथमञ्जायमान उद्यन्थ् समुद्रादुत वा पुरीषात्। श्येनस्य पक्षा हरिणस्य बाहू उपस्तुतञ्जनिम तत् ते अर्वन्न्॥ अपाम्पृष्ठमसि योनिरग्नेः समुद्र-मभितः पिन्वमानम्। वर्द्धमानम्मह ॥ [३३] ॥ आ च पुष्करन्दिवो मात्रया वरिणा प्रथस्व॥ ब्रह्म जज्ञानम्प्रथमम्पुरस्ताद् वि सीमतः सुरुचो वेन आवः। स बुद्धिया उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः॥ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा विधेम॥ द्रप्स्सश्चस्कन्द पृथिवीमनु ॥ [३४] ॥ द्यामिमञ्च योनिमनु यश्च पूर्वः। तृतीयय्योनिमनु सञ्चरन्तन्द्रप्स्सञ्जुहोम्यनु सप्त होत्राः॥ नमो अस्तु सर्पेभ्यो ये के च पृथिवीमनु। ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः॥ येऽदो रोचने दिवो ये वा सूर्यस्य रश्मिषु। येषामप्सु सदः कृतन्तेभ्यः सर्पेभ्यो नमः॥ या इषवो यातुधाना-नाय्ँये वा वनस्पतीꣳरनु। ये वाऽवटेषु शेरते तेभ्यः सर्पेभ्यो नमः ॥ [३५] ॥

(महो ऽनु यातुधानाना मेकादश च) ॥ ८ ॥

ध्रुवाऽसि धरुणाऽस्तृता विश्वकर्मणा सुकृता। मा त्वा समुद्र उद्वधीन्मा सुपर्णोऽव्यथमाना पृथिवीन्दृꣳह॥ प्रजापतिस्त्वा सादयतु पृथिव्याः पृष्ठे व्यचस्वतीम्प्रथस्वतीम्प्रथोऽसि पृथिव्यसि भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री पृथिवीयँच्छ पृथिवीन्दृꣳह पृथि-वीम्मा हिꣳसीर् विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै ॥ [३६] ॥ चरित्रायाग्नि-स्त्वाऽभि पातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद॥ काण्डा-त्काण्डात् प्ररोहन्ती परुषःपरुषः परि। एवा नो दूर्वे प्र तनु सहस्रेण शतेन च॥ या शतेन

प्रतनोषि सहस्रेण विरोहसि। तस्यास्ते देवीष्टके विधेम हविषा वयम्॥ अषाढाऽसि सहमाना सहस्वारातीः सहस्वारातीयतः सहस्व पृतनाः सहस्व पृतन्यतः। सहस्रवीर्या ॥ [३७] ॥ सि सा मा जिन्व॥ मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः। माद्ध्वीर् नः सन्त्वोषधीः॥ मधु नक्तमुतोषसि मधुमत् पार्थिवꣳ रजः। मधु द्यौरस्तु नः पिता॥ मधुमान् नो वनस्पतिर् मधुमाꣳ अस्तु सूर्यः। माध्वीर् गावो भवन्तु नः॥ मही द्यौः पृथिवी च न इमय्ँयज्ञम्मिमिक्षताम्। पिपृतान्नो भरीमभिः॥ तद्विष्णोः परमं ॥ [३८] ॥ पदꣳ सदा पश्यन्ति सूरयः। दिवीव चक्षु-राततम्॥ ध्रुवाऽसि पृथिवि सहस्व पृतन्यतः। स्यूता देवेभिरमृतेनाऽऽ*गाः॥ यास्ते अग्ने सूर्ये रुच उद्यतो दिवमातन्वन्ति रश्मिभिः। ताभिः सर्वाभी रुचे जनाय न स्कृधि॥ या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः। इन्द्राग्नी ताभिः सर्वाभी रुचन्नो धत्त बृहस्पते॥ विराड् ॥ [३९] ॥ ज्योतिरधारयथ् सम्राड् ज्योतिरधारयथ् स्वराड् ज्योतिरधारयत्॥ अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः। अरव्ँवहन्त्याशवः॥ युक्ष्वा हि देवहूतमाꣳ अश्वाꣳ अग्ने रथीरिव। नि होता पूर्व्यः सदः॥ द्रप्सस्सश्चस्कन्द पृथिवीमनु द्यामिमञ्च योनिमनु यश्च पूर्वः। तृतीयय्ँयोनिमनु सञ्चरन्तन्द्र-प्सञ्जुहोम्यनु सप्त ॥ [४०] ॥ होत्राः॥ अभूदिदव्ँविश्वस्य भुवनस्य वाजिनमग्नेर् वैश्वानरस्य च। अग्निर् ज्योतिषा ज्योतिष्मान् रुक्मो वर्चसा वर्चस्वान्॥ ऋचे त्वा रुचे त्वा समिथ् स्रवन्ति सरितो न धेनाः। अन्तर्हृदा मनसा पूयमानाः॥ घृतस्य धारा अभि चाकशीमि। हिरण्ययो वेतसो मद्ध्य आसाम्॥ तस्मिन्थ् सुपर्णो मधुकृत् कुलायी भजन्नास्ते मधु देवताभ्यः। तस्यासते हरयः सप्त तीरे स्वधान्दुहाना अमृतस्य धाराम् ॥ [४१] ॥

(प्रतिष्ठायै सहस्रवीर्या परमं विराट्थ् सप्त तीरे चत्वारि च) ॥ ९ ॥

---

आदित्यङ्गर्भम्पयसा समञ्जन्थ् सहस्रस्य प्रतिमाव्ँविश्वरूपम्। परि वृङ्धि हरसा माऽभि मृक्षः शतायुषङ्कृणुहि चीयमानः॥ इमम्मा हिꣳसीर् द्विपादम्पशूनाꣳ सहस्राक्ष मेध आ चीय-मानः। मयुमारण्यमनु ते दिशामि तेन चिन्वानस्तनुवो नि षीद॥ वातस्य ध्राजिव्ँवरुणस्य नाभिमश्वञ्जज्ञानꣳ सरिरस्य मद्ध्ये। शिशुन्नदीनाꣳ हरिमद्रिबुद्धमग्ने मा हिꣳसीः ॥ [४२] ॥ परमे व्योमन्न्॥ इमम्मा हिꣳसीरेकशफम्पशूनाङ्कनिक्रदव्ँवाजिनव्ँवाजिनेषु। गौरमारण्यमनु ते

दिशामि तेन चिन्वानस्तनुवो नि षीद॥ अजस्रमिन्दुमरुषम्भुरण्युमग्निमीडे पूर्वचित्तौ नमोभिः। स पर्वभिरृतुशः कल्पमानो गाम्मा हिꣳसीरदितिँविराजम्॥ इमꣳ समुद्रꣳ शतधारमुत्सँव्यच्यमानम्भुवनस्य मद्ध्ये। घृतन्दुहानामदितिञ्जनायाग्ने मा ॥ [४३] ॥ हिꣳसीः परमे व्योमन्न्। गवयमारण्यमनु ते दिशामि तेन चिन्वानस्तनुवो नि षीद॥ वरूत्रिन्त्वष्टुर् वरुणस्य नाभिमविञ्जज्ञानाꣳ रजसः परस्मात्। महीꣳ साहस्रीमसुरस्य मायामग्ने मा हिꣳसीः परमे व्योमन्न्॥ इमामूर्णायुँव्वरुणस्य मायान्त्वचम्पशूनान्द्विपदाञ्चतुष्पदाम्। त्वष्टुः प्रजानाम्प्रथमञ्जनित्रमग्ने मा हिꣳसीः परमे व्योमन्न्। उष्ट्रमारण्यमनु ॥ [४४] ॥ ते दिशामि तेन चिन्वानस्तनुवो नि षीद॥ यो अग्निरग्नेस्तपसोऽधि जातः शोचात् पृथिव्या उत वा दिवस्परि। येन प्रजा विश्वकर्मा व्यानट् तमग्ने हेडः परि ते वृणक्तु॥ अजा ह्यग्नेरजनिष्ट गर्भात् सा वा अपश्यज्जनितारमग्ने। तया रोहमायन्नुप मेद्ध्यासस्तया देवा देवतामग्र आयन्न्। शरभ मारण्यमनु ते दिशामि तेन चिन्वानस्तनुवो नि षीद ॥ [४५] ॥

(अग्ने मा हिꣳसी रग्ने मो ष्ट्रमारण्यमनु शरभन् नव च) ॥ १० ॥

अनुवाक १० विशेषः (आदित्य मिमन्द्विपादं मयुँव्वातस्या श्वं मिम मेकशफ ञ्जौरम जस्रङ्गवयँव्वरूत्रि मविं मिमामूर्णायु मुष्ट्रँय्यो अग्निः शरभम्॥)

---

इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः। तद् वाञ्चेति प्र वीर्यम्॥ श्नथद्वृत्रमुत सनोति वाजमिन्द्रा यो अग्नी सहुरी सपर्यात्। इरज्यन्ता वसव्यस्य भूरेः सहस्तमा सहसा वाजयन्ता॥ प्र चर्षणिभ्यः पृतना हवेषु प्र पृथिव्या रिरिचाथे दिवश्च। प्र सिन्धुभ्यः प्र गिरिभ्यो महित्वा प्रेन्द्राग्नी विश्वा भुवनाऽत्यन्या॥ मरुतो यस्य हि ॥ [४६] ॥ क्षये पाथा दिवो विमहसः। स सुगोपातमो जनः॥ यज्ञैर् वा यज्ञवाहसो विप्रस्य वा मतीनाम्। मरुतः शृणुता हवम्॥ श्रियसे कम्भानुभिः सम्मिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः। ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः॥ अव ते हेड> १, उदुत्तमं >२॥ कया नश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता ॥ [४७] ॥ को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून्। आसन्निषून् हृथ्स्वसो मयोभून्य एषाम्भृत्यामृणधथ् स जीवात्॥ अग्ने

**नयाऽऽ> ३, देवानाꣳ >४, शन्नो भवन्तु > ५, वाजेवाजे>६॥ अप्स्वग्ने सधिष्टव सौषधीरनु रुद्ध्यसे। गर्भे सञ्जायसे पुनः॥ वृषा सोम द्युमाꣳ असि वृषा देव वृषव्रतः। वृषा धर्माणि दधिषे॥ इमम्मे वरुण > ७, तत्त्वा यामि>८, त्वन्नो अग्ने>९, स त्वन्नो अग्ने> १० ॥ [४८] ॥**

(हि वृता म एकादश च) ॥ ११ ॥

## समाप्ति कोर्वैः

(विष्णोः क्रमोऽसि दिवस्प र्यन्नपते ऽपेत समितं या जाता मा नो हिꣳसी दभ्यस्थाद् ध्रुवा ऽस्यादित्यगर्भ मिन्द्राग्नी रोच नैकादश)
(विष्णो रस्मिन् हव्ये ति त्वाऽहं धीतिभिर् होत्रा अष्टाचत्वारिꣳशत्)
(विष्णोः क्रमोऽसि त्वन्नो अग्ने स त्वन्नो अग्ने)

॥ हरिः ॐ ॥

चतुर्थकाण्डे द्वितीयः प्रश्नः समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| ११ | ४८ |

ॐ